# 2023

***Time - 3 hours***

***Full Marks - 80***

*Answer **all groups** as per instructions.*
*Figures in the right hand margin indicate marks.*

## GROUP - A

१ । एकपदेन सर्वेषामुत्तरं लिखत । (१ × १२

(क) लिङ्गमात्राधिक्ये का विभक्तिः ?

(ख) का विभक्तिः कारकेषु नान्तर्भवति ?

(ग) कर्त्ताकारकविधायकं सूत्रं किमस्ति ?

(घ) रुच्यर्थानां धातूनां प्रयोगे कस्य सम्प्रदानं भवति ?

(ङ) सम्प्रदानकारके का विभक्तिः ?

(च) किं नाम करणम् ?

(छ) ''पुत्रेण सह आगतः पिता'' अत्र अप्रधानं पदं किमस्ति ?

(ज) ''अक्ष्णा काणः'' अत्र केन सूत्रेण तृतीया ?

(झ) कर्मकारके का विभक्तिः भवति ?

(ञ) "वलिं याचते वसुधाम्" अत्र अकथितं कर्म किमस्ति ?

(ट) "ग्रामं गच्छन् तृणं स्पृशति" इत्यत्र इप्सिततमं कर्म किम् ?

(ठ) अनुक्ते कर्मणि का विभक्तिः भवति ?

GROUP – B

२। अधोलिखितेषु अष्टप्रश्नानामुत्तरं संक्षेपेण लिखत । (२ × ८

(क) कः प्रातिपदिकार्थः ?

(ख) "द्रोणो व्रीहि" इत्यत्र 'द्रोण' पदस्य कोऽर्थः ?

(ग) "अधिशेते वैकुण्ठं हरिः" कस्य सूत्रस्य उदाहरणम् ?

(घ) अत्यन्तसंयोगनाम किम् ?

(ङ) 'कर्तृकरणयोस्तृतीया' इत्यस्य उदाहरणमेकं लिखत ।

(च) के द्विकर्मकधातवाः सन्ति ?

(छ) अकथितं कर्म इत्यस्य कोऽर्थः ?

(ज) अनियतलिङ्गानां किमुदाहरणम् ?

(झ) "कर्तुरीप्सिततमं कर्म" सूत्र कर्मग्रहणं किमर्थम् ?

(ञ) किं करणसंज्ञं स्यात् ?





GROUP – C

३। अधोलिखितेषु अष्टप्रश्नानामुत्तरं लिखत । (३ × ८

(क) कर्तुः किम् ? माषेष्वश्वं वध्नाति ।

(ख) अङ्गविकारः किम् ? अक्षि काणमस्य ।

(ग) तमब्ग्रहणं किम् ? गङ्गायां घोषः ।

(घ) प्रीयमाणः किम् ? देवदत्ताय रोचते मोदकः पथि ।

(ङ) अपवर्गे किम् ? मासमधीतो नायातः ?

(च) तमब्ग्रहणं किम् ? पयसा ओदनं भुङ्क्ते ।

(छ) कारकं किम् ? माणवकस्य पितरं पन्थानं पृच्छति ।

(ज) गतीत्यादि किम् ? पाचयति उदनं देवदत्तेन ।

(झ) क्षीप्स्यमानः किम् ? देवदत्ताय श्लाघते पथि ।

(ञ) ईप्सितः किम् ? पुष्पेभ्यो वने स्पृहयति ।

GROUP - D

सर्वेप्रश्नाः समाधेयाः ।

४। सूत्रमेकं सोदाहरणं व्याख्यात – (७

कर्तृरीप्सिततमं कर्म अथवा अधिशीङ्स्थासां कर्म

५। सोदाहरणं व्याख्यात – (७

प्रकृत्यादिभ्य उपसंख्यानम्

अथवा

सहयुक्तेऽप्रधाने

६। सोदाहरणं व्याख्यात – (७

धारेरुत्तमर्णः

अथवा

क्रियार्थोपपदस्य च कर्मणि स्थानिनः

७। उत्कलभाषया आङ्गलभाषया वा अनुवदत – (७

चित्तवृत्तेः निरोधो नाम योगः । येन विशिष्टसाधनेन साधकः समाधिं प्राप्नोति। मानवजीवने योगस्यावश्यकता प्राचीनकालादनुभूयते । योगाभ्यासं विना साधकस्य सिद्धिः पूर्णतां न भवति । तस्य जीवनं सम्पूर्णमपि न भवति । अतः आचार्याणामनुसारं योगः एकं मानवीयदर्शनमिति ।

अथवा

अध्ययनेन मनुष्यः स्वकर्त्तव्यं जानाति, जीवने सफलतां च प्राप्नोति । आत्मज्ञानम् अध्ययनेनैव भवति । तस्य बुद्धिः परिष्कृता भवति । सदाचारः, शान्तिः, सन्तोषः, मुक्तिः सर्वमध्ययनेनैव सम्भवति । अतः अतिशय-ध्यानयोगेन इष्टप्राप्तये निर्द्दिष्टोद्देश्यानुसारं सततमध्ययनं करणीयम्।